।।साधारणस्तुस्यात्साधारणोपरः।।तथैवानुपसंहारीत्रिधानैकांतिकोभवेत्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकरीमु०

१६ विशिष्टरूपदस्यापूर्वानतिरेकादित्यत आह। यद्विषयकत्वं चेति। एतद्विवरणप्रयोजनमाह। तेनेति। बाधभ्रमस्य बाधभ्रमत्वावारणा
स्य पर्वतविशेष्यकवह्न्यभावप्रकारकत्वादिति भावः। अनुमितिविरोधित्वेपि। अनुमितिविरोधितावच्छेदकत्वं भिन्न सत्तिः।

॥यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यं तेन बाधभ्रमस्यानुमितिविरोधित्वेपि [struck through] तत्र पर्वतो वह्न्यभाव स्पा
वानिति विशिष्टस्याप्रसिद्धत्वान्न हेतुदोषः॥ ॥ ॥ ॥

न चैवं वह्न्यभावाद्यवृत्तिव्याप्तिः तत्र तथात्वं वह्न्यभावविषयकत्वस्य पर्वतविशेष्यकवह्न्यभावप्रकारकत्वस्यानुमितिबंधकतावच्छे
दककोटिप्रविष्टत्वात् तत्राति व्याप्तिः स्यादिति भावः। यादृशविशिष्टेति विवरणे तेन तत्राति व्याप्तिरित्याह। तेने साध्येनान च व राम०

ह्न्यभावविशिष्टपर्वतत्वस्याप्रसिद्धत्वेपि यादृशविशिष्टपदेन वह्न्यभावमुपादाय तत्राति व्याप्तिरिति वाच्यं। यादृशविशिष्टे
ति विवरणेऽवतिरिक्तवृत्तित्वस्य वावच्छेदकत्वस्य लक्षणे गतिविशेषणीयत्वात् पावकृत्यभावविषयकत्वास्य प्रतिबंधकत्वाभाव
वति वह्न्यभावदृत्तिज्ञाने वृत्तेस्तत्राति व्याप्तेरभावात्। न चैवं पूर्वोक्तरीत्या वह्न्यभावविशिष्टरूपादाव्याप्तिरिति वाच्यं।
यादृशविशिष्टविषयकत्वेनेत्यस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात् त्वमिति सम्यक् तद्द्धत्वमित्यर्थकत्वात्। ह्र
दइति ज्ञाने च वह्न्यभावावच्छिन्नविषयकत्वाभावात्। अथ ज्ञानत्वातिरिक्तवृत्तित्वस्यावच्छेदकत्वस्य विवक्षणेऽनु
मितिप्रतिबंधकत्वाभाववति दोषवद्भूमात्वे तिसंशयरूपदोषवह्न्यभाववानित्याह। यन्निश्चयेऽप्रामाण्यज्ञा
नास्कंदितत्वादृशानिश्चये च वह्न्यभावविशिष्टरूपविषयकत्वस्य सत्वादसंभव इति चेन्न। ज्ञानस्ये स्वत्र ज्ञा
नपदस्याबाह्यार्थाप्रामाण्यज्ञानानास्कंदितनिश्चयपरत्वया तादृशनिश्चयनिष्ठयादृशविशिष्टविषयक
त्वमनुमितिप्रतिबंधकज्ञानवृत्तित्वातिरिक्तवृत्तित्वमिति सम्यक्त्वलाभादिति दिक्॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्प्रतिपक्षस्यानिसदोषत्ववादी शंकते। नचयत्रेति विशिष्टस्याप्रसिद्धत्वादिति। पाषाणामयत्वेवह्न्यभावव्याप्यत्वाभावा
प्यत्वाभावादिति भावः इष्टापत्तेरितित्तथा च सद्धेतुत्वां प्रतिपरामर्शीत्वपि न दुष्टत्वमिति भावः। अन्यथाप्रतिबंधकीभ
तभ्रमविषयस्यापि दोषत्वे। अनिसदोषत्वापत्तेरित्ति परसेसाध्याभावदशायां सद्धेतावपि दोषत्वापत्तेरित्यर्थः इत्थंच
यादृशविशिष्टविषयकत्वेन ज्ञानस्यप्रतिबंधकत्वं तादृशविशिष्टस्य दोषत्वे च हेत्वौरिकमिसादिवासाध्याभावविशि

नच यत्रवह्न्यभावव्याप्यपाषाणामयत्ववान् इतिपरामर्शकालेवह्निव्याप्यधूमस्याभासत्वं न स्यात्।तत्र वह्न्यभावव्या
प्यवान् इति विशिष्टस्याप्रसिद्धत्वादितिवाच्यं। इष्टापत्तेः। अन्यथा बाधस्यापि सत्प्रतिपक्षस्यापि निसदोषत्वापत्तेः। तेस्मात्तत्र वह्न्यभा
वव्याप्यपाषाणामयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं। अन्यथामुद्रानुमितिप्रतिबंधमात्रेहेतु स्तुनेदृष्ट
।।इति।इत्थंचसाध्याभाववद्वृत्तिहेत्वादिर्कं दोषः॥ ॥ ॥

स्वपरिग्रहः। यादृशविशिष्टयस्येन व्यभिचारत्वादिविशिष्टव्यभिचारत्वादिकमादायलक्षणं न संभवति। व्यभिचारविषयकत्वस्यप्र
तिबंधकतावच्छेदव्यभिचारइतिज्ञानेव्यभिचारत्वे नातिरिक्तवृत्तित्वात्। व्यभिचारादिविशिष्टहेत्वादिकमादायैवेति व्यभिचारादिविशि
ष्टहेत्वादिकमेवदोषइतिभावः। ननुव्यभिचारादिविशिष्टस्य हेतोर्दोषत्वे तद्वत्वस्य हेत्वभावाद्धेतोर्दुष्टत्वव्यवहारो न स्यान्न च तादात्म्येन राम॰
तद्धेत्वविवक्षणीयं इतिवाच्यं॥ ९

तथासतिवह्न्यभावविशिष्टहृदादेस्तादात्म्येनधूमेऽभावेनहृदपक्षकेधूमस्यादिसत इत्याह। तद्वत्त्वंचेति। नचवह्निव्यभिचारविशि
ष्टधूमत्वादेर्धूमेसत्वादतिव्याप्तिरिमाच्यं। यादृशविशिष्टविषयकज्ञानत्वेनसद्धेतुकानुमितिप्रतिबंधकत्वंतादृशविशिष्ट
आश्रयतद्धेतुत्वमेव दुष्टत्वादिति। सत्प्रतिपक्षादेरतिसदोषत्वावादिना मत्तमाह। परे त्वितिननु वह्न्यभावादिव्याप्तिपक्षदोनो

।।तद्धेत्वावहेतौ येन केनापिसंबंधेन वृत्तिमत्वाः। परेतुपद्धविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वंतद्धत्वेहेत्वाभासत्वंसत्प्र
तिपक्षे विरोधिव्याप्त्यादिकमेवत्तथाततत्वंचहेतौज्ञानरूपसंबंधेन। नचैवं वह्निमान्धूमादिसाध्येपक्षेसाध्याभाववि वाधभ्रमस्य
षयत्वेनानुमितिविरोधित्वा।ज्ञानरूपसंबंधेनतद्वत्वस्यत्वात्सद्धेतोपिवाधित्वापत्तिरितिवा[illegible]च्यं॥ ॥ ॥
तत्र ज्ञानरूपसंबंधत्वाकल्पनात् अत्र सत्[illegible]पशितबवहारे लततकल्पनात्॥

पादात्तु शक्यत्वेपितस्याधूमावत्तित्वान्धूमस्यदुष्टत्वंस्यादत आह। तद्वत्त्वंचेति ज्ञानेनेति। स्वज्ञानत्वेनतद्वत्त्वमिस
र्थः। तद्धेतत्वस्य साध्याभाववत्त्वस्य तत्रवाधकालीनेधूमादिसद्धेतावित्यर्थः। अत्र प्रतिपरामर्शकालीनेधूमादिसद्धेतौ।
तत्कल्पनात्तज्ज्ञानत्वस्यसंबंधत्वकल्पनात्॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकरीमु०

१८ न्नुसद्धेतावप्यवाधिदिति व्यवहारेण संबंधत्वकल्पनां ज्ञानस्य भवीष्यतीत्यत आह तत्रेति वाधेत्यनकालीनेसद्धेत्वातीत
र्थः प्रसुप्तायंवाधितः पुरुषस्तु स्वातंत्र्येव व्यवहारादिति भावः तादृशव्यवहारा व्यवहारयोग्यानुभवमात्रसाक्षिक
त्वमाहुरिति अस्वरसवीजं। यथाश्रुत विरोधित्वसागेवीजमाह। तेनेत्यादिना नेनुत्तद्धेतुकत्तत्साध्यकानुमितिप्रतिहे

न्नलक्ष्यनमि — तत्र चवाधित व्यवहाराभावो ... साह। अनुमितिविरोधित्वं च अनुमितित्वकारणा न्यतरविरोधित्वं तेनेक
हेतौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पत्तावपि न क्षतिः ज्ञानस्यानुमितिविरोधित्वाभावेऽन्नस्य पि
तीरितिसंक्षेपः॥

व्यभि२

तीतत्साध्यव्यभिचारस्य हेत्वाभावे हेतुर्वाच्यस्तत्राह। तदभावेतिनस्यति नाव्याप्तिः। नुनुत्पन्नत्वसमानाधिकरणेन्यवच्छेदकत्वं नस्व
रूपसंबंधविशेषः पूर्वोक्तदोषादिसनतिरिक्तवृत्तित्वमेव निष्पन्न तथा च धूमवान्वह्नेरित्यादौ प्रमेयत्वविशिष्टव्यभिचर — राम०
तिव्याप्तिस्तद्विषयकत्वस्य प्रतिबंधकज्ञानतिरिक्तावृत्तित्वात्तत्राह। संक्षेपइतिप्रकृतानु॥ ७॥ ७॥ ७॥ — १८

मितिप्रतिबंधकतावच्छेदकांतरघटितत्वेनानुमितिविरोधितावच्छेदकविशेषणीयंप्रमेयत्वविशिष्टव्यभिचार
स्य प्रकृतानुमितिप्रतिबंधकतावच्छेदकं। हेतौ योव्यभिचारस्तद्घटितस्यैवेतिप्रनतत्रातिप्रसंगइतिदिक्। नन्वत्रानु
मितित्वकारणज्ञानान्यतरप्रतिबंधकत्वं मम तन्नास्ति प्रतिवध्यतानिरूपकत्वघटितप्रतिसत्तेदोपर्वतो वह्निमान
धूमादित्यादौ वह्न्यभावविशिष्टहेतुरस्यापि दोषताप्रसंगः तस्यपर्वतोवह्निमान्हेतौ वह्निमानितिसमूहालंब
नात्मकप्रकृतानुमितिनिष्ठप्रतिवध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात्। यद्यपि चतादृशान्यतरत्वावच्छि
न्नप्रतिबंध्यताकनिरूपितत्वघटितंतरानादृशान्यतरत्वस्याकस्याचित्प्रतिवध्यतानवच्छेदकतयासंभवः ता
दृशान्यतरत्वव्यापकप्रतिवध्यतानिवेशेऽपि च व्यभिचारादेर्वाधादौ च व्याप्तिः। व्यभिचारादेरनुमित्सविरोधितयावा
धादेश्च व्याप्तिज्ञानाविरोधितयातत्प्रतिवध्यतास्त्याविधान्यतरत्वात्। किंतु तद्धर्मावच्छिन्नपक्षकतद्ध
र्मावच्छिन्नहेतुकानुमितित्वकारणज्ञानान्यतरविरोधित्वं लक्षणे निवेशनीयं अन्यथा पर्वतो वह्निमान्
धूमादित्यादौ पर्वतोऽसौ कांचनमयत्वाभावो हेत्वाभासः स्यात्॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१९

एवंचनिर्वह्निः पर्वतोवह्निमान्निर्वह्निर्वह्निमानित्यादौनैकोपिहेत्वाभासस्यात्तादृशानुमितेरतस्त्राह । यादृशसाध्येतिसंभवेसि
वायुर्गंधवान्स्नेहादित्सर्वहेत्वाभाससंभवइतिभवः । हेत्वाभासलक्षणमुक्त्वाप्रत्येकंलक्षणमाहोपुस्त्रनैकांतिकादिलक्षणेषुक
चिद्दोषंहृदिनिधायस्वयमनैकांतिकादीनांलक्षणमाह । रावमितिसाधारणादीनां साधारणानुपसंहारिणोपरिग्रहः । तन्न
तस्यानुमितित्तत्कारणज्ञानान्यतरविरोधिज्ञानविषयकत्वाभावात् । कथहेत्वाभासत्वमित्यतोदूषकताबीजमाह । तेनचे
क ॥ यादृशसाध्यपक्षेतिज्ञोपावंतोदोषास्तावद्न्यत्वेनहेत्वाभासत्वंपंचत्वकथनंतुतत्संभवस्थलाभिप्रायेण । एवंसाधारणा
घनृत्तमत्वंनैकांतिकत्वंसाधारणःसाध्यवदन्यावृत्तिःतेनचव्याप्तिज्ञानप्रतिबंधःक्रियते । असाधारणःसाध्यासमाना
धिकरणः तेनसाध्यसमानाधिकरण्यग्रहःप्रतिबध्यते ॥
त्ति । एवमग्रेपि । क्रियतइति । व्याप्तिघटकाव्यभिचारांशेव्यभिचारज्ञानंस्यप्रतिबंधकात्वादितिभावः । प्रतिबध्यतइति । व्याप्तिघ
टकीभूतसामानाधिकरण्यग्रहःप्रतिबध्यतइत्यर्थः । एवंचसाधारणासाधारणानुपसंहारिणांव्याप्तिज्ञानप्रतिबंधकरूपदू
षकतावीजैक्येनैकहेत्वाभासत्वमुपपत्तेसाधारणेनाव्यभिचारग्रहस्यासाधारणेनसामानाधिकरण्यग्रहस्यानुपसंहा
रिणाचव्यतिरेकव्याप्तिग्रहस्यप्रतिबंधादितिभावः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ राम०

१९

प्राचीनमतमाह । अन्येत्विति । पक्षेसाध्यसंदेहदशायामेवासाधारणस्यहेत्वाभासत्वंननुनिश्चयदशायांतदायक्षस्यैवसपक्षत्वे
ननिश्चितसाध्यवत्त्वाभावेनत्वाभावादिसनिरस्तदोषत्वेनतस्येत्याह । इत्यंचेति । असाधारणघटकसपक्षत्वनिश्चयत्वघटितत्वेस्ये

॥ अन्येतुसपक्षाव्यावृत्तिरसाधारणःसपक्षश्चविनिश्चितसाध्यवानइत्येवंयदापक्षेसाध्यनिश्चयस्तदानासाधारणत्वंतत्रहे ५१
तौनिश्चयादिसाद्गुःअनुपसंहारिचअत्यंताभावप्रतियोगिसाध्यकादिरनेनव्यतिरेकव्याप्तिग्रहप्रतिबंधःक्रियते ।
विरुद्धस्तुसाध्यव्यापकीभूताभावप्रतियोगी । अयंसाध्याभावग्रहसामग्रीत्वेनप्रतिबंधकः ॥ ॥ ॥ ॥ ।

सर्थः । तत्रानिश्चितसाध्यवतिपक्षे । साधारणादित्रयाणामिहत्रयाणामेकहेत्वाभासत्वानुपपत्तिर्वदतीत्यनेनस्वरसःसूचितः
व्यतिरेकव्याप्तिग्रहप्रतिबंधकइतिकेवलान्वयिसाध्यकेचान्वयव्याप्तिज्ञानादेवानुमितिरितिभावः ॥ छ ॥ छ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवं साध्याभावसाधकात्सत्प्रतिपक्षाद्विरुद्धस्य भेदो न स्यादत आह। सत्प्रतिपक्षे त्विति। प्रतिहेतुः प्रतिकूलो हेतुरिती
यो हेतुः इति विशेषणं इत्थं च नयोर्भेदः नन्वनुदूषकतावीजैक्येपि हेतुभेदे सत्प्रतिपक्षो हेत्वाभासांतरं मिथः स्यादित्यत आह यत्रा
न्वयिनाहेतुत्वे तत्र साध्यप्रतिरोधस्तत्र सत्प्रतिपक्षोपगतत्वमतिरिक्तमात्तत्र हेत्वाभासांतरं स्यादतो भेदकांतरमप्याह। सा

॥ सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः अन्यत्र हेतुरेवेति विशेषः। साध्याभावसाधकत्व एव साध्यसाधक
त्वेनोपन्यस्तत्वे स्वशक्तिविशेषो ज्ञापकतावद्विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान्पक्षः ॥ छ ॥ ॥

ध्याभावेत्तिवस्तुतः साध्याभावसाधकहेतावेव तत्र साध्यसाधकत्वमप्रतिसंधाय प्रवादिनं प्रति भ्रमरूपाशक्तिस्र
चकत्वे विरुद्धस्य तत्त्वेवं सत्प्रतिपक्षस्येति भावः। साध्याभावव्याप्येति। एवं साध्यवत्त्वमन्ये व्याप्यवान्पक्षः। पक्षनि
ष्ठो साध्याभावसाध्यवत्त्वव्याप्यावपि बोध्यौ। अन्यतमत्वादिना अनुगमान्न विभागव्याघातः ॥ छ ॥ छ ॥ ॥ राम०
१०

सत्प्रतिपक्षस्य व्यवहारोपयिकमन्येषां सत्प्रतिपक्षत्वं स्वरूपमाह। अगृहीतेति। निरुक्तव्याप्यवत्ताज्ञानस्य कालीनानिरु
क्तव्याप्यवत्ताकत्वपरामर्शसत्वेपि सत्प्रतिपक्षव्यवहाराभावात्तत्कालीनोत्तमुपस्थितिविशेषणं। गृहीताप्रामाण्यकनिरुक्तव्या
प्यवत्ताज्ञानकालीनानिरुक्तव्याप्यवत्ताकत्वपरामर्शसत्वेपि तत्र व्यवहाराभावादगृहीताप्रामाण्यकेतिप्रथमोपस्थिति
विशेषणं। तादृशकालीनानिरुक्तव्याप्यवत्तापरामर्शसत्वेपि तत्राप्रामाण्यग्रहकाले तथाव्यवहाराभावादगृहीताप्रामाण्य

॥ अगृहीताप्रामाण्यकसाध्यव्याप्य[illegible]त्वेनोपस्थितिकालीनतदभावव्याप्य[illegible]त्वेनोपस्थितिविषयः सद्धेतुरन्यो वा
चेत्परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधफलं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कत्वं हि तृतीयोपस्थितिविशेषणं। व्यवहारमात्रोपयोगिनो निरुक्तरूपस्य प्रकृतानुपयोगः उपस्थितिघटितस्योक्तरूपस्य स्व
रूपसत एवोपयुक्तस्याभासत्तायामप्रयोजकत्वादित्यस्वरसस्तु चेपत्ति। अन्यदिति॥ सत्प्रतिपक्षस्य दूषकताबीजं प्रदर्शयति
अत्रैव सादिना। सत्प्रतिपक्षस्य संशयजनकत्वं दूषकताबीजं न त्वनुमितिप्रतिबंधकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमि
तिप्रतिबंधकत्वे मानाभावादिति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ रत्नकोशाकारमतं दूषयितुमुपन्यस्यति। अत्र केचिदित्यादिना। अनुमितिर्भवत्येवेति। अनुमितिप्रतीतितदभावव्याप्यवत्ता
ज्ञानस्य प्रतिबंधकत्वे मानाभावः इकृसत्तत्तदभावानुमितिसामग्रीभ्यामेव तत्तदभावकोटिकसंशयानुमितिउपपत्तौ सं
शयानुमितिप्रसक्तभयव्याप्यवत्तानिश्चयत्वेनातिरिक्तहेतुकल्पनप्रयुक्तगौरवाभावाद्वेति भावः। ननु यद्युभयभासकस्तत्र

॥ अत्र केचित्। यथा घटाभावव्याप्यवत्ताज्ञाने विद्यमानेपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते यथा च सर्पत्वसा पी
भावव्याप्यंशवत्ववत्ताज्ञानेपि सति पित्तादिदोषेपीतःशंखइति धीरेवं कोटिद्वयव्याप्यदर्शने कोटिद्वयस्य प्रसक्तरूपः सं
शयो भवति। तत्र यत्र सत्यपि सस्थले संशयरूपानुमितिर्भवत्येव। यत्र चैककोटिव्याप्यदर्शनं तत्राधिकबलत्वाद्द्वितीयकोटि
द्विमानप्रतिबंधान्नसंशयः। फलबलेन वा अधिकबलसमबलभावकल्पतइत्याहुः। तन्न तदभाववत्ताज्ञानेसतितद्रूपनीतिभा व्याप्यत्व
न विशेषशाब्दबोधादेरनुदयात्। लौकिकसन्निकर्षजन्यदोषविशेषाजन्यान्यमोहार्थ ॥ ॥ ॥ ॥ ॥ ॥ ॥
उभयभानेतदापि ज्ञानदोषसत्त्वेपि पीतत्वभूल्कत्वोभयस्मरणानुभवयोर्मानापत्तिरिसक्त्वाहुः फलबलेन चेति। तथा च तत्रापीतत्वसा
साकारस्यैवानुभविकत्वपाशु [redacted] ग्रहे पित्तरूपदोषस्य प्रतिबंधकत्वकल्पि त्वापीतस्य साकारसामग्र्या अधिक
बलमेव द्रुत्वमेव दूरत्वदोषे सत्यपि स्थाणुत्वे पुरुषत्वयोस्मरणे संशयस्यैवोदयात् तत्सामग्र्योः समबलत्वमेव कल्प्यत इति भावः॥ राम०

२१

ज्ञानमात्रे। तादृशज्ञानत्वावच्छिन्ने विशेषदोषविशेषाजन्ये गौरवादिति। कार्यकारणाभावद्वयकल्पने गौरवादिति भावः। कथ
मनुमितिरिति। अनुमितेरपि तत्प्रतिबध्यतावच्छेदकाक्रान्तत्वादिति भावः। कथं तर्ह्युभयव्याप्यवत्तानिश्चयोत्प्राप्तिकः

॥ ज्ञानमात्रे तत्स्य प्रतिबंधकत्वाल्लाघवात्। तत्तदुपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबंधकत्वागौरवात्। तथा च प्र
तिबंधकसत्त्वात्कथं अनुमितिः। नहि लौकिकसन्निकर्षस्थले प्रसक्तमिव सत्प्रतिपक्षस्थले संशयानुमितिः प्रा
माणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयं। यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञाना त्तत्प्रायः
नान्यथा। अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति। असिद्धिस्तु। आश्रयासिद्धिरन्यतमा। आ ६४
श्रयासिद्धिःपक्षे पक्षतावच्छेदकस्याभावः। यत्र च कांचनमयःपर्वतो वह्निमानिति साध्यते तत्र पर्वतो न कांचनमय इ
ति ज्ञाने विद्यमाने कांचनमये पर्वते परामर्शप्रतिबंधः फलं। स्वरूपासिद्धिस्तु। पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र च ह्रदो
धूमाद्ग्र्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलं
संशयदशायां कथनभवत्येवताववघावत्तन्निश्चये अप्रामाण्यं न स्यादित्याहुः। यत्र चेति। आश्रयासिद्ध्यादौ साध्यत्वरूपासि
द्धिव्याप्यत्वासिद्ध्योः परिग्रहः। साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ साध्याप्रसिद्ध्यादयस्त्विति। आदिना साधनासिद्धिपरिग्रहः। केषांचिन्मतमाह। एवं वह्निमानित्यादिना। वदंतीत्यनेनास्वर
सत्त्वं हृदि। ननु नीलधूमे व्याप्तिसत्त्वात्कथं व्याप्यत्वासिद्धिः। न च तत्र व्याप्तिसत्त्वेपि नीलधूमत्वस्यानवच्छेदकत्वात्तदवच्छे
तावच्छेदकविशिष्टसाध्यपरामर्शे एव फलं। हेतोर्हेतुर

॥ साध्याप्रसिद्ध्यादयस्त्विति व्याप्यत्वासिद्धिः साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः एतत्ज्ञाने जाते च कां
चनमयवह्निमानित्यादौ साध्यतावच्छेदकाभावः साधनाप्रसिद्धिः यथा कांचनमयधूमादित्यादौ अत्र च हेतुताव
छेदकविशिष्टहेतुज्ञानस्याभावात्तद्धेतुकव्याप्तिज्ञानादिरभावः फलं। एवं वह्निमान्नीलधूमादित्यादौ गुरुत्वया
४म नीलधूमत्वस्य हेतुतानवच्छेदकत्वेपि व्याप्यत्वासिद्धिरित्यपि वदंति। बाधस्तु पक्षे साध्याभावादिः एतस्य चान
नुमितिप्रतिबंधः फलं ॥ ॥

रेन व्याप्यत्वासिद्धिरेवेति वाच्यं। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेपि सत्त्वात्। स्वरूपसंबंधरूपावच्छेदक राम०
त्वाभा ॥ ॥ ॥ १२

त्वाद्व्याप्यत्वासिद्धिरित्यपि न। तथा सति पशुमान् सास्नादिमत्त्वादित्यादावपि व्याप्यत्वासिद्ध्यापत्तेः सास्नाद्यपेक्षया गो
त्वादिजातेर्लघुत्वेन सास्नादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्। अस्तु वा नीलधूमत्वादेः स्वरूपसंबंधरूपावच्छे
दकत्वाभावात्तदवच्छेदेन व्याप्त्यभावरूपा व्याप्यत्वासिद्धिर्न तु। तस्या हेत्वाभासत्वे। अनुमितिकारणीभूतव्या
प्तिज्ञानाविरोधित्वात्। न च वह्निमान् स्यात् इति प्रमेयवानित्यत्र प्रमेयत्वसामानाधिकरण्येन व्याप्त्यवगाहि ज्ञानाद
नुमित्यापत्तिवारणाय हेतुतावच्छेदेन व्याप्तिज्ञानस्यैव कारणतया तद्विरोधितया निरुक्तव्याप्यत्वासिद्धेर्हे
त्वाभास इति वाच्यं। तावतापि। अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञानस्याकारणत्वेपि तत्र स्वरूपसंबंधरूपा
वच्छेदकत्वाभावग्रहस्य ग्राह्याभावानवगाहितया विरोधित्वात्। तस्माद्व्यर्थविशेषणत्वेन व्याप्य
त्वासिद्धिर्हेत्वाभासः पुरुषस्याधिकेनेति ध्येयमिति। साध्याभावादित्यादिना साध्यवत्त्वस्य पक्षे सावृत्ति
साध्यादेश्च परिग्रहः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकरी

दिनकरीमु०

२२

तद्धर्मिकतरभावनिश्चयःअनाहार्येप्रामाण्यज्ञानानास्कंदिततद्धर्मिकतरभावनियतःबाधबुद्ध्युत्तरप्रसरोलौकिकसन्निक
र्षाजन्यविशिष्टज्ञानुभाविकत्वादाह। लौकिकसन्निकर्षाजन्येति। नन्वेवं तदिंद्रियजन्यलौकिकबाधनिश्चयोत्तरादिंद्रिय
जन्यलौकिकविशिष्टबुध्यापत्तिरितिचेन्नात्र लौकिकत्वं प्रतिबध्यतावच्छेदककोटावनिवेश्यतदिंद्रियजन्यतद्विशिष्ट

॥ तद्धर्मिकतरभावनिश्चयोलौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रेविरोधीति ॥ ॥

बुद्धौ तदिंद्रियजन्यलौकिकतद्भावनिश्चयत्वेन प्रतिबंधकत्वेन प्रतिबंधकत्वोपगमात् तदिंद्रियजन्योपनीतभानात्मकबा
धनिश्चयोत्तरं तदिंद्रियजन्यलौकिकतद्विशिष्टबुद्धेरुत्पत्तिप्रतिबंधकतावच्छेदककोटौ लौकिकत्वस्यानिवेशः। नच
लौकिकतदिंद्रियजन्याभावप्रमास्ति ॥ ७ ॥

राम०

२३

लेत्तरधिकरणप्रतियोगिनोऽसत्वारोपेवतद्विशिष्टलौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबंधकभावेनेतिवा
च्यं यत्रप्रतियोगिन्यधिकरणस्य च सन्निकृष्टाधिकरणान्तरवृत्तेरभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेणाजनित
स्तदुत्तरं तदधिकरणेप्रतियोगिनो लौकिकप्रत्यक्षापादनात् तत्राभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबंधकत्वा
दावेनियमापत्तिरन्यथाऽभावारोपोत्पत्तिसमयेप्रतियोगिप्रत्यक्षापत्तिरितितुनयत्रविनश्वरत्वात्स्यादोषेणाभा
वलौकिकप्रत्यक्षात्मकारोपस्तदुत्तरं प्रतियोगिप्रत्यक्षापादनात् यत्राभावलौकिकप्रमासमकालं तद्धीतीय
क्षणोवात् दधिकरणेप्रतियोगिप्रकारकानुभूयमानारोपजनकदोषसमवधानं तत्राभावप्रमातरं प्रतियोगि
नोलौकिकप्रत्यक्षात्मकारोपापादनवारणाय वा इंद्रियमेद्रेनतथाविधप्रतिबध्यप्रतिबंधकभावोपगमात्
शंखपीतः वशोनोरगइतिनिश्चयेपि पित्तमंडूकवसांजनादिदोषवशात् शंखः पीतः अयमुरग इत्यारोपोदया
त् तत्रव्यभिचारवारणायाह। दोषविशेषेति। दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैवबाधाप्रतिबध्य
त्वापत्तिरतोविशेषेति। तथाच पित्तमंडूकवसांजनादिदोषान्विशिष्योपादायतत्तद्जन्यत्वंप्रतिबध्यतावच्छेदक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोटौनिवेशनीयमितिभावः॥नचपित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्यर्थः॥शंखः पीत इति भ्रमे शंखत्वांशेनुभूयमानस्येवपि
तद्भ्रमपीतिमन्यारोपोपगमेनतदंशे लौकिकत्वात् लौकिकत्वस्यप्रतिवध्यतावच्छेदके निवेशादेवतत्रव्यभिचारवारणा
दितिवाच्यं पित्तद्रव्यस्यात्मानवस्थानदशायामपित्तसीतिभ्रमः॥ शंखवादौप्रसंसोदयेन स्मर्यमाणारोपस्यैवतत्रदीनिः
स्वीकाराज्जतदंशेतस्यालौकिकत्वात्॥तथाप्रतिशंखः पीत इतिप्रसंसोत्तरं पीतिसाक्षात्करोमीतिसाक्षात्कारित्वप्रत्यानु
पपत्तिस्तद्व्यंजकलौकिकविषयतायास्तत्राभावादितितुनलौकिकविषयतायास्तद्दोषविशेषजन्यत्वस्यापिसाक्षा
त्कारित्वव्यंजकत्वात्स्यथाऽयमनुसगइति स्मर्यमाणारोपेपिसाक्षात्कारित्वप्रत्यानुपपत्तेः॥शंखोवानपीतइत्यासात्तदिंद्रियजन्य
बाधबुद्धुत्तरमपिज्वरादिदोषवशात्तत्तदिंद्रियजन्यः शंखपीतइत्यारोपोपप्यनुभवसिद्धस्तदपूर्वोक्तेंद्रियभेदभिन्नप्रति
वध्यप्रतिबंधकभावेपिदोषविशेषाजन्यत्वं प्रतिवध्यतावच्छेदके निवेशनीयमितिध्येयं॥ किंतु बाधप्रतिवध्यतावच्छेदक
कोटौलौकिकान्यत्वस्यनिवेशेबाधनिश्चयप्रीतरंलौकिकसन्निकर्षजन्यसंशयापत्तिरितिचेन्नाभूतलघटवदितिसा ॥

क्षात्कारकलौकिकप्रसंसोसत्तिकालेस्वातंत्र्येणाकथंचिदुपस्थितस्यघटाभावादेर्भूतलेप्रकारतयाभानवारणायस
मानधर्मितावच्छेदकत्वकोटिलौकिकप्रसंसस्सामग्र्याविपरीतकोटिभानप्रतिबंधकत्वमंगीकरणीयं॥तथाचबा
धनिश्चयोत्तरमपिनापत्तिःलौकिकसन्निकर्षजन्यसंशयस्यतत्कोटिलौकिकप्रसंससामग्र्याः प्रतिबंधिकायाः
सत्वेनविपरीतकोटिभानासंभवात्॥नहिकापिलौकिककर्षजन्यसंशयोनस्यादितिचेत्॥ ओम्॥ज्ञातप्रसंसासत्वेपू
र्वोपस्थितकोट्यौभानसंभवादिति॥यतु॥संशयपूर्वत्वकोट्यंशेलौकिकसन्निकर्षस्त्वेकथंसंशयस्यनलौकि
कत्वं॥कथंवात्रसंशयेविपरीतकोटिभानं॥तत्कोटिलौकिकप्रसंससामग्र्याःप्रतिबंधिकायास्तत्रसत्वादिति
॥तन्न॥तत्रलौकिकसन्निकर्षसत्वेपिसंशयजनकदूरत्वादिदोषस्यलौकिकप्रसंसप्रतिबंधकस्यसत्वेनलौ
किकप्रसंसप्रतिबंधकस्यसत्वेनलौकिकप्रसंससामग्र्यभावादुभयोपपत्तेरित्यन्यविस्तरः॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यचिन्मतंदूषयति।नन्विति।इत्तियुक्तमित्यनेनान्वयः।नन्वेवंबाधनिश्चयकालेसंसर्गत्वज्ञानाभावादेवानुमित्यभावोपप
त्तौबाधनिश्चयस्यनानुमितिविरोधित्वमितिहेत्वाभासत्वेनस्यादत आह।तद्विरोधित्वेति।अनुमितिकारणीभूतसा
ध्यसंसर्गत्वज्ञानविरोधित्वेपत्यर्थः।अन्वयप्रसिद्धसाध्यकानुमितिः।कुत्रापिनभवत्येवेत्यत आह।साध्यसंशयेतिनन्नु

॥नन्नुसंशयसाधारणपक्षेसाध्यसंसर्गत्वज्ञानमनुमितिकारणंतद्विरोधित्वयाचबाधस्यत्वतियथार्थोर्हेत्वाभा
सत्वमितियुक्तं।अप्रसिद्धसाधकानुमित्यनापत्तेःसाध्यसंशयादिकंविनाप्यनुमित्युत्पत्तेश्च॥ ॥ ॥

संशयस्यकालेपिसिषाधयिषाकालीनसाध्यनिश्चयात्मकसाध्यसंसर्गत्वज्ञानमस्त्येवेत्यत आह।आदिति।आदिना
सिषाधयिषाकालीनस्यपरिग्रहः।नचसंशयोत्तरोत्पत्स्यैवानुमितिवाच्यंसतिविशेषदर्शनेसंशयायोगात्।पक्ष
विष्येकसाध्याभावज्ञानप्रमात्वनिश्चयोनुमितिप्रतिबंधकस्तदभावःकारणमतस्तादृशप्रमात्वमेवबाधइति

प्रवीणमतंदूषयति।एवमिति।प्रमात्वज्ञानमपिप्रमात्वनिश्चयोपिमानाभावादितियाद्यभावानवगाहिनसादृश्या
नस्यविरोधित्वेमानाभावादित्यर्थः।ननुपक्षेसाध्याभावज्ञानेपितत्राप्रमाण्यज्ञानकालेऽनुमित्तेरुदयान्नसाध्याभा
वज्ञानंप्रतिबंधकं।अस्मन्मतेतुतदासाध्याभावनेप्रमात्वनिश्चयाभावादेवानुमित्युत्पत्तिरत आह।गौरवदिति।त
याचतत्रानुमितिनिर्वाहायसंशयविशेषसाधारणाप्रामाण्याज्ञानाभावस्यप्रतिबंधकतावच्छेदककोटौनि

॥एवंसाध्याभावज्ञानेप्रमात्वज्ञानमपिनप्रतिबंधकंप्रमाण्याभावात्गौरवाच्च॥ ॥ ॥

वेशयतेननुपक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेनप्रतिबंधकत्वेगौरवादित्यर्थः।यत्रपक्षेसाध्याभावज्ञा
नमस्तिनतुतत्रप्रामाण्यंज्ञानंनवा।प्रामाण्यज्ञानेतत्राप्यनुमितिर्नभवत्येवेतिभावः।साध्याभाववत्पक्षघटि
तप्रमात्वविषयकत्वेऽनुमितिप्रतिबंधकतामतिरिक्तत्वकृत्तित्वसत्वात्तस्यामास्त्वदर्वीरमितितत्तुनप्रमेयत्वविशि
ष्टव्यभिचारादेरिवतद्घटितविशिष्टांतरघटितत्वेनाभासत्वापत्तेरिति॥छ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकरीमु०

२६

ननुगृहीतप्रामाण्यकसाध्याभाववन्निश्चयस्यप्रतिबंधकत्वेप्रथमोपस्थितप्रमात्वनिश्चयसत्वात्तथाप्याह। अन्यथे
तिसत्प्रतिपक्षादाविसादिनामिध्यादिपरिग्रहः प्रतिबंधकत्वापत्तेरितिस्यानुमित्साविरहादिः। ननुसाध्याभावज्ञा
नप्रमात्वज्ञानेऽनुमितिप्रतिबंधकत्वरभावेत्तेनेसन्वयव्यतिरेकाभ्यांप्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत्तन्नाह। किं
त्विति। क्वचिदुपयुज्यत इतितथाचानुमितित्तकारणाज्ञानान्यत्तरप्रतिसाक्षात्प्रतिबंधकीभूतज्ञानविषयत्वाभावा
।अन्यथासत्प्रतिपक्षादावपितद्भावव्याप्यज्ञानप्रमात्वविषयकत्वेनप्रतिबंधकत्वापत्तेः किंतुभ्रमत्वज्ञानानास्कंदि
तबाधबुद्धेःप्रतिबंधकता। अत्रचभ्रमत्वर्णकाविघटनेऽप्रामाण्यज्ञानं क्वचिदुपयुज्यते। नचबाधस्थलेपक्षेहेतुस
त्वेव्यभिचारस्यसिद्धेःत्वभावस्वरूपासिद्धिरेवदोषइतिवाच्यं। बाधज्ञानव्यभिचारज्ञानयोर्भु·भेदात्॥ ॥ ॥
नसाध्याभावप्रमात्वेहेत्वाभासइतिभावः। व्यभिचारज्ञानादेरिसादिसादिनासिद्धिज्ञानपरिग्रहः भेदादितितथाचबाधस्य
लेऽसिद्धिव्यभिचारान्यतरनियमेपिबाधज्ञानस्यव्यभिचारादिविषयकत्वाभावेनतस्यहेत्वाभासांतरत्वमितिभावः। नचैतन्मु
मात्रपक्षः साध्याभाववानित्याकारकएवबाधग्रहः कुतोनभवतिसामग्रीसत्वात्तथाचव्यभिचारज्ञाना। त्रिकैवबाधनु
।द्धिरितिवाच्यंपरामर्शात्मकाव्यभिचारज्ञानरूपप्रतिबंधसत्वेनबाधबुद्धेर्व्यभिचारविषयकत्वासंभावात्। एकत्रहेतौव्य
भिचाराव्यभिविषयकेक्वनिश्चयासंभावात्॥

राम०

२६

नन्वयोगोलकपक्षकधूमसाध्यकवह्निहेतुकेबाधस्यलौकिकप्रत्यक्षस्यव्यभिचारलौकिकप्रत्यक्षसमुपस्थित्यामिलिमिश्रयेसत्यपिभ
वात्यतीसिद्धत्याह। किंचेति। अकिंचित्करइति। व्यभिचारज्ञानेहि अनुमितौनसाक्षात्प्रतिबंधकं। किंतुपरामर्शप्रतिबंधद्वारा
तथाचपरामर्शोत्तरकालीनव्यभिचारज्ञानमकिंचित्करमिति। तत्रबाधबुद्धिरेवप्रतिबंधिकेतिभावः। व्यभिचारापसेकीरी
मपिवार्थप्रदर्शयति। सव्यभिचारादिबा। बाधस्यैवेति। नत्रपक्षेहेतुसत्वेनस्वरूपासिद्धिः। प्रतियोगिव्यधिकरणसाध्याभा
।अत्रचकिंयपरामर्शानंतरंबाधबुद्धिस्तत्रव्यभिचारज्ञानाद्दरकिंचित्करत्वाबाधस्यानुमितिप्रतिबंधकत्वंवाच्यं। एवंच
ऽत्रप्रतिसत्तावच्छिन्नेघटादौगंधव्याप्यपृथिवीत्वत्वज्ञानेनतत्रबाधस्यैवप्रतिबंधकत्वंवाच्यं। नचपक्षेघटेगं
धसत्वात्कथंबाधइतिवाच्यं। सत्तावच्छेदकदेशकालावच्छेदेनानुमितेरनुद्भववत्सिद्धत्वादिति। बाधस्तु व्याप्य
भिन्नायेहेत्वाभासास्तद्व्याप्यापित्तन्मध्यएवान्तर्भवतीति। अन्यथाहेत्वाभासाधिक्यप्रसंगात्। बाधव्याप्य
सत्प्रतिपक्षोभिन्नएव। स्वतंत्रेच्छेनमुनिनायत्पृथगुपादानात्सत्प्रतिपक्षद्वयमस्तु॥ ॥ ॥ ।
बाधद्वितीयरूपस्यव्यभिचारस्यचाभावादितिभावः। बाधतद्व्याप्यभिन्नायेहेत्वाभासास्तद्व्याप्यापित्तन्मध्यएवांतर्भवती
तिपाठः। बाधःसाध्याभावविशिष्टपक्षादिः तद्व्याप्यसत्प्रतिपक्षस्तद्भिन्नाव्यभिचारविरुद्धासिद्धास्तद्व्याप्यानांतत्रैवांत
र्भावइत्यर्थः। व्यभिचारादिरिवव्यभिचारादिव्याप्यस्यापिव्याप्तिग्रहप्रतिबंधकज्ञानविषयत्वेनपक्षेहेत्वाभासोनतेगतिरिति

॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नप्रवृत्तिर्बंधकइति। साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञानविरोधित्वेमानाभावात् इति भावः। दूषकताबीजस्यभि
न्नत्वेति। साधारणस्याव्यभिचारज्ञानेविरुद्धस्य सामानाधिकरण्यग्रहे प्रतिबंधकत्वाद्विति भावः। असाधारणघटकं सपक्ष

॥ नप्रतिबंधकइत्यर्थः। पक्षसपक्षइति। सपक्षविपक्षसाधारणइत्यर्थः। सपक्षः साध्यवान् विपक्षः साध्यवद्भिन्नः विरु
द्धवारणाय सपक्षवृत्तित्वमुक्तं। वस्तुतोपि पक्षवृत्तित्वमेववाच्यं। विरुद्धस्य साधारणत्वेपि दूषकताबीजस्यभिन्नत्व
यातस्यायार्थक्यात् यत्तूभयस्माद्दिति। सपक्षविपक्षव्यावृत्त इत्यर्थः। सपक्षः साध्यवत्तयानिश्चितः विपक्षः साध्य
शून्यत्वेनाभिनिश्चितः शब्दो। निःशब्दत्वादित्यादौ पक्षशब्दे। निरवयवस्य संदेहे तदा सपक्षत्वं घटादीनामेवात्र ध्या
वृत्तं च शब्दत्वमिति तदासाधारण्यं यदातु शब्दे निरवयवनिश्चये तदानासाधारणं। इदंतु प्राचां मतेन नवीनमतं तु पूर्व
उक्तं तद्व्येयेति॥

त्वेनिश्चयगर्भंनतु साध्यवत्त्वमात्रमित्याह। सपक्षइति। एवमग्रेपि सपक्षत्वविपक्षत्वयोर्निश्चयपनिवेशस्य फलमाह। शब्दइत्या
दिना। पूर्वमुक्तमिति। असाधारणः साध्यसामानाधिकरण्यग्रहस्यानोक्तमित्यर्थः॥ ७॥ ७॥ ७॥ ७॥ ७॥

।केवलान्वयिपक्षकइतीति। अत्रच पक्षता साध्यसंशयरूपा ग्राह्या। तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ पक्षासिद्धेःसिषाधयिषा
चतदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात्तस्य सद्धेतोरलक्ष्यत्वात् सिषाविरह विरह विशि
ष्टसिद्ध्यभावस्यतदा केवलान्वयिन्यपि तत्रनातिव्याप्तिः। अनुपसंहारिणोहेत्वाभासत्वमुपपादयति। सर्वमस्यैव

॥केवलान्वयीपक्षइति। सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैवपक्षत्वात्सामानाधिकरण्यग्रहस्यलोके तदाभावा
॥ त्नानुमितिः। इदंतु न सम्यक् पक्षैकदेशे सहचारग्रहेपि॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पक्षत्वात्सामानाधिकरण्यग्रहस्य छलाभावादिति। संशयोसत्तिपक्षणोनिश्चयवारणाय निश्चयं प्रतिसंशयसामग्र्याः प्रति
बंधकत्वस्यावश्यं वाच्यत्वात् तथा कृते सर्वत्रसाध्यसंदेहे संदेहत्व सूक्तत्वसामग्र्याः सत्वेन साध्यनिश्चयस्य कुत्राप्यसंभवे
न व्यापकसाध्यसामानाधिकरण्यसंग्रहायो विशिष्टधूमत्वादिरूपव्याप्तिग्रहात्तु साध्यान्तत्वेत्रानुमितिरित्यनुपसंहारि
णोहेत्वाभासत्वमितिभावः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षतेरभावादिति। तदानीमपि केवलान्वयिप सत्ताकत्वरूपस्यानुपसंहारित्वस्य सत्तेरभावादित्यर्थः। तथा च तत्राऽनुपसंहा
रित्वस्य सत्वात्तस्य व्याप्तिज्ञानानुसारस्य प्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः। न च संशयसामग्र्याः सत्वात्के
वलान्वयिपक्षैकदेशो साध्यानिश्चय इति वाच्यं। सर्वत्वधर्मित्तावच्छेदककसंशयसामग्रीसत्वेपि घटत्वादिधर्मितावच्
छेदककसाध्यनिश्चयोत्पादे बाधकाभावात्। समानप्रकारकत्वेनैव विरोधात्। समानविषयत्वेन प्रतिबंधकत्वे

॥ क्षतेरभावात्। अत्र सत्त्वा सहचारग्रहस्तावता व्याप्यत्वज्ञानरूपासिद्धिरेव न तु तावता हेत्वाभासत्वं तस्यात्रापि
केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तं। साध्यवतीति। एवकारेण साध्यकं [redacted] त्वावच्छेदेन हेत्वाभावो बोधि
तस्तथा च साध्यव्याप्यकीभूताभावप्रतियोगित्वं॥

प्याह। अत्रसत्त्वेति तस्य सहचाराग्रहस्य स्वरूपसत्त्व एव विरोधित्वेन तत्त्वज्ञानस्यानुमित्यनुसारे प्रयोजकत्वाभावादि
ति भावः। न च तत्र सहचाराग्रहप्रयोजकसंशय एव हेत्वाभासस्तस्यापि स्वरूपसत्त्व एव विरोधित्वात्। न च संशयवि
षयस्य साध्याभावविशिष्टपक्षस्यादेव तत्राभासत्वमिति वाच्यं। सर्वमभिधेयमित्यादावभिधेयत्वाभावविशिष्टस्याप्रसिद्धेरि

त्यर्थ इति। तेन साधारण्येनातिव्याप्तिरिति भावः॥ धूमप्रागभावत्वेति॥ तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्सं
ग्रहो न स्यादिति भावः। स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्याघटितत्वाभावाद्धूमेतरेति। न च नीलधूमत्वस्यापि

॥ तदर्थः। असिद्धिं विभजते। आश्रयासिद्धिरित्यादी स्वरूपासिद्धिरिति। आश्रयासिद्धिरित्यर्थः। अपरेति। स्वरूपासि
द्धिरित्यर्थः। नीलधूमादिक इति। नीलधूमत्वं गुरुत्वेन हेतुतावच्छेदक। स्वसामानाधिकरणकरणव्याप्यतावच्छे
दकधर्मांतराघटितस्यैव व्याप्यतावच्छेदकत्वात्। धूमप्रागभावत्वसंग्रहाय सामानिकरणेति विरुद्धयोरिति।
कपिसंयोगाभावव्याप्यवतापरमपि पिनसलतिपक्षित्वमत उक्तं विरुद्धयोरिति ॥ ॥ ॥ ॥ ॥ ॥

तादृशधर्मांतराघटितत्वमस्यैवाधूमत्वस्य नीलधूमत्वमित्येतत्वाभावादिति वाच्यं। स्वाविषयकप्रतीतिविषय॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वस्य स्वपर्याप्तावच्छेदकतानिरूपकप्रकारत्वानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात्। शुद्धधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारतयोर्भेदात्तेनान्वे तं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकत्वानुपपत्तिः तत्स्य वह्नित्वरूपतादृशधर्मान्तरत्वात्॥ धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तिभिया धर्मान्तरस्य विशेष्यविधया घटकत्वाविवक्षणस्याशक्यत्वादिति चेन्न। स्वसमानाधिकरणाप्रतियोगिकत्वव्यापकस्य विवक्षितत्वात्। वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकत्वाद्धूमत्वस्य धूमान्यान्यत्वव्यापकत्वाच्चोक्तदोषासंभवात्। स्वव्यापकत्वं च धर्मान्तरस्य स्वघटकसाध्यसंबंधितावच्छेदकत्वेन॥ अन्यथा धूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति॥ ॥

विरुद्धयोः परामर्शे हेत्वोरिप्यत्र विरुद्धयोर्हेत्वोः परामर्श इति भ्रमवारणायाह। स्वसाध्येति। स्वसत्प्रतिपक्षत्वेनाभिमतो हेतुस्तत्साध्याभावः इत्यर्थः। नत्त्वसतिकालीनघटादिसाधकलोकत्वं मयुक्तं। तत्र पक्षे घटगंधप्रागभावत्वाभावादतत्राह। पक्ष

॥ तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयत्वमर्थः। साध्यमनुमितिपक्षः पक्षतावच्छेदकविशिष्टत्वमर्थः। तेन घटे गंधसत्त्वे पि न क्षतिः एवंमूलावच्छेदेन वक्षकपिसंयोगी इत्यत्रापि बोध्यं॥ इति श्रीन्यायसिद्धांतमुक्तावल्यामनुमानपरिच्छेदः॥ ॥ ॥

तावच्छेदकेति॥ कालस्येव देशस्यापि पक्षतावच्छेदकत्वे बाधसंभवात्तदप्रदर्शनेन न्यूनत्वं परिहर्तुमाह। स्वंमित्रेवोध्यमिति। तत्र पक्षे वृक्षे संयोगत्वेपि पक्षतावच्छेदेन संयोगाभावादिति भावः॥ इति श्रीमुक्तावलीप्रकाशेऽनुमानपरिच्छेदः॥ श्रीरामचंद्राय नमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=09.08.19 15:45
,TRANSFERRED=2019/08/09 at 15:53:17
,PAGES=31
,TYPE=STD
,NAME=S0001433
,Book Name=M-800-NYAYSIDHHANT MUKTAVALI PRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE30=00000030.TIF
,FILE31=00000031.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection